अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासम्प्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्य-यौगपद्यसादृश्यसम्पत्तिसाकल्यान्तवचनेषु। (६/६५२)

सुप् सुपा इति [1]च वर्तते। विभक्त्यादिष्वर्थेषु यदव्ययं वर्तते तत् समर्थेन सुबन्तेन सह समस्यते, [2]अव्ययी-भावश्च समासो भवति। [3]वचनग्रहणं प्रत्येकं [4]सम्बध्यते।

[5]विभक्तिवचने तावत् — स्त्रीष्वधिकृत्य [6]कथा प्रवर्तते अधिस्त्रि। अधिकुमारि। सप्तम्यर्थे यदव्ययं तद् विभक्तिवचनम्।

[7]समीपवचने — कुम्भस्य समीपम् उपकुम्भम्। [8]उपमणिकम्।

[9]समृद्धिर्ऋद्धेराधिक्यम् — समृद्धिर्मद्राणां सुमद्रम्[10]। [11]सुमगधं वर्तते।

[12]व्यृद्धिर्ऋद्धेरभावः — [13]गवदिकानामृद्धेरभावः [14]दुर्गवदिकम्। [15]दुर्यवनं वर्तते।

[16]अर्थाभावः [17]वस्तुनोऽभावः — अभावो मक्षिकाणां निर्मक्षिकम्[18]। निर्मशकम् वर्तते।

[19]अत्ययः अभूतत्वम्, अतिक्रमः — [20]अतीतानि हिमानि अतिहिमम्। [21]निर्हिमम्। निःशीतं वर्तते।

[22]असम्प्रति [23]उपभोगस्य वर्तमानकालप्रतिषेधः — अतितैसृकम्। तैसृकमाच्छादनम्, तस्यायमुपभोगकालो न भवति इत्यर्थः।

[24]शब्दप्रादुर्भावः [25]प्रकाशता शब्दस्य — इतिपाणिनि। [26]तत्पाणिनि। पाणिनिशब्दो लोके प्रकाशते इत्यर्थः।

[27]पश्चात् — अनुरथं [28]पादातम्। रथानां पश्चात् इत्यर्थः।

यथा। यथार्थे यदव्ययं वर्तते तत् समस्यते। योग्यता वीप्सा पदार्थानतिवृत्तिः सादृश्यं च इति यथार्थाः। योग्यतायाम् — [29]अनुरूपम्। रूपयोग्यं [30]भवति इत्यर्थः। वीप्सायाम् — अर्थमर्थं प्रति प्रत्यर्थम्।

---

1. च नास्ति ड. 2. स समासो अव्ययीभावसंज्ञकश्च क.ड.ह. 3. वचनपदं क. 4. अभिसम्बध्यते क. ड. इ. ह. 5. विभक्त्यर्थे तावत् क.ह.इ. 6. कथाः प्रवर्तन्ते क. 7. समीपे क. ड. 8. उपमणिकम् नास्ति ड.इ. 9. समृद्धौ क. 10. वर्तते इत्यधिकम् क. ड. 11. समृद्धं क. 12. व्यृद्धौ क. 13. शकानां व्यृद्धिः दुःशकं ड. ह. इ. 14. दुःशाब्दिकं ब, दुर्गष्टिकं क. 15. दुश्च्यावनं क. 16. अर्थाभावे क.इ. 17. वस्तुनः नास्ति ब. क. 18. वर्तते इत्यधिकम् क. 19. अत्यये क. ड. 20. अतीतानि शीतानि अतिशीतं क. ह. ड. 21. निर्हिमम् नास्ति क. 22. असंप्रतौ क. 23. उपभोग्यस्य क, उपभोग्यस्य वस्तुनः ड. 24. शब्दप्रादुर्भावे क. 25. प्रकाश्यता क. 26. यत्पाणिनि क. ड. 27. पश्चादर्थे क. ड. 28. पदातिः इ. 29. सुरूपम् क.ह. 30. वदति ह.ड.